Semester-II, CC-4, Sec-C, Gita: Self management through devotion. (XII.13-14)

प्रश्नः – अधस्थितस्य श्लोकस्य प्रसङ्गोल्लेखपूर्वकं संस्कृतेन देवनागरलिप्या च व्याख्यानं कुरुत।

उत्तरम् –

अद्वेष्टा सर्वभूतानां मैत्रः करुण एव च।
निर्ममो निरहंकारः समदुःखसुखः क्षमी॥
सन्तुष्टः सततं योगी यतात्मा दृढनिश्चयः।
मय्यर्पितमनोबुद्धिर्यो मद्भक्तः स मे प्रियः॥ (गीता - १२.१३-१४)

महर्षिवेदव्यासविरचितायाः श्रीमद्भगवद्गीतायाः भक्तियोगाभिधेयात् द्वादशाध्यायात् समाचितमिदं प्रस्तुतं द्वयं पद्यप्रसूनम्।

भगवद्भक्तानां गुणराशिं वर्णयन् आह भगवान् श्रीकृष्णः "अद्वेष्टा सर्वभूतानाम्....." इति।

यः जनः मद्भक्तः मम भजनाकारी, सर्वभूतानां सर्वान् प्राणिनः प्रति, अद्वेष्टा द्वेषरहितः, च अपि च, मैत्रः मैत्रभावापन्नः, करुणः करुणयुक्तः, निर्ममः ममत्वहीनः, निरहंकारः अहंकाररहितः, समदुःखसुखः दुःखे सुखे च सममनोभावापन्नः, क्षमी क्षमापरायणः, सततं सर्वदा, सन्तुष्टः सन्तोषयुक्तः, योगी योगनिरतः, यतात्मा संयतचित्तः, दृढनिश्चयः स्थिरः अध्यवसाययुक्तः, मय्यर्पितमनोबुद्धिः ईश्वरे मनः बुद्धिश्च यस्य समर्पितम्, सः जनः मे मम प्रियः प्रीत्यास्पदम् इति सान्वयप्रतिपदार्थाः।

पूर्वस्मिन् श्लोके उक्तं भगवता यत् सर्वकर्मफलत्यागेन कर्मानुष्ठानं श्रेयः इति। यः मद्भक्तः, सर्वेषु प्राणिषु द्वेषरहितः, सर्वभूतान् प्रति यः मित्रभावापन्नः, स एव करुणः। तस्मात् स एव सर्वभूतानाम् अभयप्रदः।

स हि समदुःखसुखः। तस्य द्वेषरागौ न स्तः। अतएव सुखदुःखबोधोऽपि नास्ति। स हि क्षमावान्। आक्रुष्टेऽपि अभिहतेऽपि स अविक्रिय एव तिष्ठति।

स हि सततं सन्तुष्टः। देहस्थितिकारणेषु लब्धेषु अलब्धेषु वा नास्ति तस्य कश्चिद् असन्तोषः। सर्वदा पर्याप्तिबुद्धिसमन्वितः सन् वर्तते सः। स हि योगी। ईश्वरे चित्तसमाधानं ईश्वरार्थे च कर्मानुष्ठानं योग उच्यते। स हि संयतचित्तस्तथा तस्य अध्यावसायः स्थिरः। स हि मय्यर्पितमनोबुद्धिः मयि वासुदेवे यस्य संकल्पात्मकं मनस्तथा अध्यायवसायरूपा बुद्धिः स्थापिता। एतादृशः मम भक्तः मम वासुदेवस्य प्रियः इति तात्पर्यम्।

अत्र शङ्कराचार्येण उक्तम् एते गुणा अक्षरोपासकानां निवृत्तसर्वैषणानाम् उल्लिखिताः। तन्मते ज्ञानिनो एवैते गुणाः प्रोक्ताः। किन्तु मद्भक्तः इति विशेषणं तथा मय्यर्पितृ-मनोबुद्धिरिति विशेषणमपि कथं ज्ञानिनः प्रयोक्तुं शक्यते इति प्रश्नः समुदेति। तस्मात् मतान्तरे भक्तियोगसमाश्रितानां भक्तानाम् एवैते गुणाः न त ज्ञानिनः अक्षरोपासकस्य इति शम्।